O. P. JINDAL SCHOOL, SAVITRI NAGAR

Half Yearly Examination (2026 – 2027)

Class: VIII **MM: 50**

Subject: Sanskrit **Time: 2. Hrs.**

Name: _____ Roll No.: _____

Fifteen Minutes Extra will be for reading the Question Paper.

निर्देशाः– 1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

खण्ड **'क'**	अपठित अवबोधनम्	(08 अङ्काः)
खण्ड **'ख'**	रचनात्मकंकार्यम्	(10 अङ्काः)
खण्ड **'ग'**	अनुप्रयुक्तव्याकरणम्	(12 अङ्काः)
खण्ड **'घ'**	पठित–अवबोधनम्	(20 अङ्काः)

2) सर्वेप्रश्नाः अनिवार्याः।

3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

4) प्रश्नसंख्या अवश्यं लेखनीया।

5) उत्तराणि संस्कृतेन एव लेखनीयानि।

(खण्ड–क) अपठित–अवबोधनम्

प्र01 निम्नलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–

(निम्नलिखित अनुच्छेद को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

उद्यमः खलु मानवस्य प्रधानतमः बन्धुः। अयम् एव मानवस्य विपत्तिं दूरीकरोति। खगाः उद्यमेन एव भोजनं एकत्री कुर्वन्ति। पिपीलिकाः परिश्रमं कृत्वा अन्नं प्राप्नुवन्ति। परिश्रमस्य एव प्रभावः यत् अद्य मानवः मीनम् इव जलमध्ये संचरति खगं इव च आकाशे भ्रमति।

I एकपदेन उत्तरत–(एकपद में उत्तर दीजिए) **(½x2=1)**

i कः मानवस्य प्रधानतमः बन्धुः ?

ii कः मानवस्य विपत्तिं दूरीकरोति ?

iii खगाः कथं भोजनं एकत्री कुर्वन्ति ?

II पूर्णवाक्येन उत्तरत – **(2x2=4)**

i पिपीलिकाः किं कृत्वा अन्नं प्राप्नुवन्ति ?

ii परिश्रमस्य प्रभावेन मानवः किं–किं करोति ?

III प्रदत्तविकल्पेभ्यः उचितम् उत्तरतं चित्वा लिखत– (केवलं प्रश्नत्रयम्) **(1x3=3)**

i 'अयम् एव मानवस्य विपत्तिं दूरीकरोति।' अस्मिन् वाक्ये 'अयम्' इति सर्वनामपदम् कस्मै प्रयुक्तम् ?

(अ) उद्यमः (ब) उद्यमाय

(स) उद्यमम् (द) उद्यमेन

ii 'मानवः' अस्य किम् क्रियापदम् अत्र प्रयुक्तम् ?

(अ) भ्रमन्ति (ब) भ्रमतः

(स) भ्रमति (द) भ्रमथः

iii 'बन्धुः' इति पदस्य विशेषण पदं किं प्रयुक्तम् ?

(अ) प्रधानता (ब) प्रधानतमम्

(स) प्रधानतमः (द) प्रधानताम्

iv 'मानवः मीनम् इव जलमध्ये संचरति' अस्मिन् वाक्ये किं अव्ययपदम् अत्र प्रयुक्तम् ?

(अ) मानवः (ब) मीनम्

(स) इव (द) जलमध्ये

(खण्ड–ख) रचनात्मकंकार्यम्

प्र02 मित्रं सप्तकक्षायां प्रथमस्थानं प्राप्त्यर्थम् अधोलिखितं वर्धापनपत्रं मंजूषायाः सहायतया पूरयत–

(आपका मित्र सप्तम कक्षा में प्रथम स्थान प्राप्त किया है। बधाई–पत्र को मंजूषा की सहायता से पुनः लिखिए–) **(½x6=3)**

कमलानगम्,
नवदेहली

प्रिय मित्र सुभाषः दिनांकः .....

सप्रेम नमोनमः।

अत्र कुशलम् तत्र अस्तु। अद्य एव भवतः (1) ..... ज्ञातः यत् भवान् सप्तमकक्षायां (2) ..... प्राप्तवान्। एतद् ज्ञात्वा अहम् अति (3) ..... अभवम्। अयं तु भवतः परिश्रमस्य एव (4) .....अस्ति। (5) ..... यत् भवान् अष्ट–कक्षायाम् अपि अधिकतरम् (6) ..... प्राप्स्यति। गृहे सर्वेभ्योः नमोनमः।


भवतः मित्रम्
सुकर्णः

मञ्जूषा –

अङ्कान्, प्रथमस्थानम्, प्रसन्नः, पत्रेण, आशासे, परिणामः

प्र03 अधोप्रदत्तचित्रं दृष्ट्वा मंजूषायाः सहायतया चतुर्वाक्येषु चित्रवर्णनम् कुरुत। **(1x4=4)**

(मंजूषा में दिए गए शब्दों की सहायता से संस्कृत भाषा में चार वाक्यों में चित्रवर्णन कीजिए)



आधुनिक, आदर्श–विद्यालयस्य, परीक्षणम्, सुन्दरम्, कुर्वन्ति, प्रसन्नाः, प्राङ्गणम्, द्वे बालिके, खेलितुम्

प्र0 4 अधोलिखितं संवादं मंजूषायां प्रदत्त शब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखत– (½x6=3)

(निम्नलिखित वार्तालाप को मंजूषा की सहायता से उचित शब्द चुनकर **पुनः** लिखिए)

नमिता – सुनीते! किम् जातम् ? त्वम् तु अद्यत्वे न दृश्यसे ?

सुनीता – आम्।

नमिता – (1) ..... ?

सुनीता – मम बोर्ड–परीक्षा तु (2) ..... एव।

नमिता – बोर्ड–परीक्षा! (आश्चर्येण सह)

सुनीता – आम्।

नमिता – बोर्ड–परीक्षा तु दश– कक्षायां (3) ..... ।

सुनीता – आम्। परं अस्माकं विद्यालये तु अष्ट–कक्षायाम् अपि (4) ..... भवति।

नमिता – ओह.....!

सुनीता – डी.ए.वी. विद्यालयेषु (5) ..... अपि बोर्ड–परीक्षा भवति।

नमिता – एतत् तु अहम् अद्य एव (6) ..... ।

मञ्जूषा –

भवति, किमर्थम्, अष्ट–कक्षायाम्, समीपम्, अवगच्छम्, बोर्ड–परीक्षा

खण्ड 'ग' अनुप्रयुक्त–व्याकरणम्

प्र0 5 अधोलिखितानां प्रश्नानाम् उत्तराणि प्रदत्तः विकल्पेभ्यः चित्वा लिखत– (½x4=2)

(निम्नलिखित प्रश्नों को विकल्पों से सही उत्तर चुनकर लिखिए) (कोई चार प्रश्न)

i संस्कृत वर्णमालायां कति स्वराः सन्ति ?

(क) दश (ख) त्रयोदश

(ग) चतुर्दश (घ) षोडश

ii निम्नलिखितेषु ह्रस्वः स्वराः के सन्ति ?

(क) प्, ल्, य् (ख) च्, म्, ग्

(ग) अ उ, लृ (घ) ऐ, ई, आ

iii 'फ' कस्य वर्गस्य व्यंजनवर्णम् अस्ति ?

(क) चवर्गस्य (ख) टवर्गस्य

(ग) पवर्गस्य (घ) तवर्गस्य

iv अन्तस्थ व्यंजनानां समूहः कः अस्ति ?

(क) य्, र्, ल्, व् (ख) श्, ष्, स्, ह्

(ग) क्, ख् ,ग्, घ् (घ) च्, छ्, ज्, झ्

v 'त्र' कयोः वर्णयोः संयोगः अस्ति ?

(क) त् + र् (ख) त् + ल्

(ग) ट् + र् (घ) थ् + र्

प्र0 6 अधोलिखितवाक्येषु स्थूलपदानाम् संधि–विच्छेदं वा प्रदत्तः विकल्पेभ्यः चित्वा लिखत–
(निम्नलिखित स्थूलपदों का विकल्पों से सही उत्तर चुनकर लिखिए) (कोई तीन प्रश्न) (1x3=3)

i महात्मा गांधी **सत्य + आग्रहः** आन्दोलनं अकरोत्।
(क) सत्याग्रहाः (ख) सत्याग्रहः
(ग) सत्याग्रहम् (घ) सत्याग्रहे

ii **महर्षिः** वाल्मीकि रामायणं अरचयत्।
(क) महा + ऋषि (ख) मह + ऋषि
(ग) महा + ऋर्षि (घ) महे + ऋषि

iii सर्वे जनाः **सदा + एव** प्रसन्नाः भवन्ति।
(क) सदाएव (ख) सदेव
(ग) सदैव (घ) सद्यपि

iv उद्यानम् **अत्यन्तम्** रमणीयम् अस्ति।
(क) अती + अन्तम् (ख) अति + अन्तम्
(ग) अते + अन्ते (घ) अत्यन् + तम्

v विद्यालयस्य **भो + अनम्** जर्जरम् अभवत्।
(क) भोनम् (ख) भोवनम्
(ग) भवनम् (घ) भावनम्

प्र0 7 **अंकेन लिखितं समयं संस्कृतपदेन लिखत–** (केवलं प्रश्नचतुष्टयम्) (½x4=2)
(अंकों में लिखे समय को शब्दों में लिखकर रिक्तस्थान को पूरा कीजिए)

i गणेशः सायं (6:00) ..... वादने क्रीडति।

ii सः नित्यं प्रातः (5:15) ..... वादने उत्तिष्ठति।

iii सः प्रतिदिनं मध्याह्ने (1:30) ..... भोजनं करोति।

iv तदा सः अपराह्णे (4:45) ..... विश्रामं करोति।

v तदा रात्रौ (10:15) ..... शयनाय गच्छति।

प्र0 8 **प्रदत्तविकल्पेभ्यः उचितं शुद्धपदं चित्वा रिक्तस्थानानि पूरयत–** (½x6=3)
(निम्नलिखित प्रश्नों को विकल्पों से उचित उत्तर चुनकर रिक्तस्थानपूर्ति कीजिए)

i भवान् कुत्र ———— ?
(अ) पठसि (ब) पठामि
(स) पठति (द) पठतः

ii ताः कन्याः चतुराः ————।
(अ) सन्ति (ब) अस्मि
(स) अस्ति (द) स्तः

iii वयम् अवश्यमेव ————।
(अ) करिष्यामि (ब) करिष्यामः
(स) करिष्यावः (द) करिष्यन्ति

iv युवां विद्यालयं ————।
(अ) गच्छसि (ब) गच्छामि
(स) गच्छथ (द) गच्छथः

v तौ लेखं ————।
(अ) लिखतः (ब) लिखति
(स) लिखथ (द) लिखसि

vi सा विद्यालये ———— आसीत्।

(अ) द्वितीयम् (ब) द्वितीया

(स) द्वितीयः (द) द्वितीयेन

प्र0 9 विकल्पेभ्यः उचितानि संख्यापदानि चित्वा रिक्तस्थानानि पूरयत– (½x4=2)

(विकल्पों से उचित संख्यापद चुनकर रिक्तस्थान को पूरा कीजिए) (केवलं प्रश्नचतुष्टयम्)

i पुस्तकालये (93) ..... पुस्तकानि सन्ति।

(क) त्रयोनवति (ख) नवत्रिंशत्

(ग) त्रीणिनवति (घ) नवत्रीणि

ii राजा दशरथस्य (4) ..... पुत्राः आसन्।

(क) चत्वारि (ख) चत्वारः

(ग) चतस्रः (घ) चतुराणि

iii ब्रह्मणः आयुः (100) ..... वर्षाणि सन्ति।

(क) शतानि (ख) शतम्

(ग) शताः (घ) शतमी

iv मम गृहस्य पुरतः (18) ..... वृक्षाः सन्ति।

(क) अष्टादशाः (ख) अष्टदशानि

(ग) अष्टादश (घ) अष्टादशे

v अस्माकं कक्षायां (35) ..... छात्राः सन्ति।

(क) पंचत्रिंशत् (ख) त्रिपंचाशत्

(ग) त्रिंशत्पंच (घ) पंचत्रिंशताः

खण्ड 'घ' पठित–अवबोधनम्

प्र0 10 अधोलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत –

(निम्नलिखित अनुच्छेद को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

अनन्तरं सः व्याधः सुदूरात् जालापहारकान् तान् अवलोक्य पश्चात् अधावत् परं तस्य दृष्टिपथात् दूरं गतेषु पक्षिषु स व्याधो निवृत्तः। अथ व्याधं निवृत्तं दृष्ट्वा कपोताः उक्तवन्तः – "स्वामिन्! किमिदानीं कर्तुम् उचितम् ?" चित्रग्रीवः उवाच – "प्रियकपोताः! अस्माकं मित्रं हिरण्यको नाम मूषकराजः गण्डकीतीरे चित्रवने निवसति। सोऽस्माकं पाशान् दन्तबलेन छेत्स्यति।" एतत् आलोच्य सर्वे हिरण्यकस्य विवरसमीपं गताः। हिरण्यकश्च सर्वदा अनिष्टशङ्कया शतद्वारं विवरं कृत्वा निवसति। ततो हिरण्यकः कपोतान् अवपातभयात् चकितस्तूष्णीं स्थितः। चित्रग्रीव उवाच' "सखे हिरण्यके! किम् अस्माभिः सह न सम्भाषते ?"

I एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) (½x2=1)

i हिरण्यकः कुत्र वसति ?

ii जालं केन छिन्नम् ?

iii मूषकराजस्य नाम किम् आसीत् ?

II पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) (1x2=2)

i चित्रग्रीवः कपोतान् किम् अवदत् ?

ii कपोताः कुत्र गताः ?

iii व्याधः कपोतान् दृष्ट्वा किम् अकरोत् ?

III निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) (1x2=2)

i "प्रियकपोताः" इति कः वदति ?

अ) चित्रग्रीवः ब) हिरण्यकः स) व्याधः

ii 'सखे हिरण्यक! इति कः सम्बोधयति ?
अ) कपोताः ब) चित्रग्रीवः स) हिरण्यकः

iii कपोतानां राजा कः आसीत् ?
अ) हिरण्यकः ब) चित्रग्रीवः स) व्याधः

प्र0 11 अधोलिखितं नाट्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–

(निम्नलिखित संवाद को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

अध्यापकः – उत्तमम्। अस्माकं दैनिकं जीवनं 'डिजिटल्' इत्यनेन परिवर्तनं प्रभावितं च भवति। अस्य क्षेत्रं व्यापकम् अस्ति। यथा – 'डिजिटल्–शासनं, स्वास्थ्यसेवा, शिक्षणं, वित्तीयं समावेशनम्' इत्यादीनि क्षेत्राणि।

यशिका – अहं स्वयं 'डिजि–लॉकर' इत्यस्य उपयोगं करोमि। मम आधरपत्रं विद्यालयीयं प्रमाणपत्रं च तत्र सुरक्षितम् अस्ति।

अथर्वः – मम पितरौ 'फास्टॅग्' इत्यस्य उपयोगं कुरुतः। अनेन राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य सङ्ग्रहणं शीघ्रं भवति।

भास्करः – अहम् 'एकीकृत–धनदेयप्रत्यर्पण–अन्तरफलकस्य' (यूपीआय्) उपयोगं करोमि। अनेन मम पितरौ अपि त्वरया मह्यं धनं प्रेषयितुं शक्नुतः।

अध्यापकः – उत्तमम्! वित्तीयंसमावेशनस्य क्षेत्रे 'यूपीआय्, रूपे–कार्ड्, जनधनयोजना' इत्यादीनि बहूनि साधनानि सन्ति। अधुना आपणेषु वस्तुक्रयणार्थं साक्षात् मुद्रायाः आवश्यकता नास्ति। मुद्रारहित–विनिमयसन्दर्भे विश्वे भारतस्य अग्रगण्यं स्थानम् अस्ति।

राघवः – डिजिटल्–योजना भारतस्य काचित् महत्वाकाङ्क्षिणी योजना अस्ति।

I **एकपदेन उत्तरत–** (केवलं प्रश्नद्वयम्) (½x2=1)

i यशिका कस्य उपयोगं करोति ?

ii अथर्वस्य पिता कस्य उपयोगं करोति ?

iii भास्करः कस्य उपयोगं करोति ?

II **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) (1x2=2)

i डिजिटल्–यन्त्रेण अस्माकं जीवनं कथं प्रभावितं भवति ?

ii वित्तीयंसमावेशनस्य क्षेत्रे के साधनानि सन्ति ?

iii अथर्वस्य पिता फास्टैगस्य उपयोगं किमर्थं करोति ?

III **निर्देशानुसारम् उत्तरत** – (केवलं प्रश्नद्वयम्) (1x2=2)

i "शीघ्रं भवति" इति अत्र क्रियापदस्य किम् ?
अ) भवति ब) शीघ्रम् स) न भवति

ii 'वित्तम्' इत्यर्थे संवादे किम् शब्दं प्रयुक्तम् ?
अ) धनम् ब) उपयोगं स) शुल्कम्

iii 'अग्रगण्यं स्थानम्' इति अत्र विशेष्यपदं किम् ?
अ) अग्रम् ब) गण्यम् स) स्थानम्

प्र0 12 अधः मंजूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत– (½x6=3)
(मंजूषा से उचित शब्द चुनकर रिक्तस्थान को पूरा कीजिए)

i प्रधानमन्त्रिसङ्ग्रहालये हॉलोग्राम्–द्वारा ..... दृश्यते।

ii डिजिटल्–भारतस्य आर्थिकसमावेशनं सुगमं ..... प्रणाली अस्ति।

iii डिजिटल्–शासनं ..... सेवां प्रददाति।

iv डिजिटल्–भारतस्य शिक्षाक्षेत्रे ..... नाम डिजिटल्–शैक्षिकमंचः अस्ति।

v भारतस्य डिजिटल् परिवर्तनं सर्वाणि ..... क्षेत्राणि स्पृशति।

vi एषा भारतसर्वकारस्य ..... महत्वाकाङ्क्षिणी योजना अस्ति।

विशिष्टा, दीक्षा, यूपीआय्, प्रधानमन्त्रिणः भाषणं, स्वचालितं पारदर्शकं च, जीवन

प्र0 13 परस्परयोः स्तम्भयोः मेलनं कुरुत– (परस्पर उचित मिलान कीजिए) (½x4=2)

'क' स्तम्भः	'ख' स्तम्भः
(अ) एकेन चक्रेण न रथस्य गतिः	(क) प्रज्ञा,दमः,दानं,कृतज्ञता इत्यादयः
(ब) भवन्ति नम्राः तरवः फलोद्गमैः	(ख) भारतभूमेः माहात्म्यवर्णनम्
(स) अष्टौ गुणाः पुरुषं दीपयन्ति	(ग) सत्पुरुषाणां स्वाभाविकी नम्रता
(द) गायन्ति देवाः किल गीतकानि	(घ) केवलं दैवं प्रयत्नं विना असिद्धम्

प्र0 14 निम्नलिखित श्लोकं पठित्वा तस्य अन्वयं मंजूषा सहायतया पुनः लिखत– (½x4=2)
(निम्नलिखित श्लोक को पढ़कर मंजूषा से शब्द चुनकर अन्वय को पूरा कीजिए)

(क) दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत्।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्।।

अन्वयः– दुर्तनेन समम् (1) ..... प्रीतिं च अपि न (2) .....। उष्णः
(3) ..... दहति शीतः च करं (4) .....।

कृष्णायते, सख्यं, कारयेत्, अङ्गारः

अथवा :–

(ख) यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा।।

अन्वयः– यथा (1) ..... –छेदन–ताप–ताडनैः चतुर्भिः (उपायैः) (2) ..... परीक्ष्यते।
तथा (3) ..... शीलेन गुणेन कर्मणा च चतुर्भिः (4) ..... परीक्ष्यते।

पुरुषः कुलेन, कनकं, निघर्षण,

प्र0 15 विकल्पेभ्यः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत– (½x6=3)

(विकल्पों से उचित पद चुनकर रिक्तस्थान को पूरा कीजिए)

i "गायन्ति देवाः किल गीतकानि" – इत्यस्य श्लोकस्य मुख्यविषयः कः ?

(क) वसन्तस्य सौन्दर्यम् (ख) भारतभूमेः गौरवम्

(ग) कर्मणां फलम् (घ) दानस्य प्रभावः

ii "गुणी गुणं वेत्ति" – इत्यत्र कः गुणं न जानाति ?

(क) गुणी (ख) निर्गुणः

(ग) पिकः (घ) बली

iii "पिको वसन्तस्यगुणं न वायसः" – इत्यस्य तात्पर्यं किम् ?

(क) पिकः मधुरं गायति न वायसः (ख) सुजन एव गुणं जानाति

(ग) वायसः अपि सरसं गानं करोति (घ) वसन्तः निर्गुणः अस्ति

iv "भवन्ति नम्राः तरवः फलोद्गमैः" – इत्यस्य कः अर्थः ?

(क) वृक्षाणाम् कठोरता (ख) सत्पुरुषाणां उन्नति

(ग) फलयुक्ताः वृक्षाः नम्राः भवन्ति (घ) परोपकारिणां दुर्बलता

V "न सा सभा यत्र न सन्ति वृद्धाः" – इत्यत्र सभायाः महत्वं किम् ?

(क) सभा मनोरंजनाय भवति (ख) सभा धनसम्पत्तिं प्रदातुं शक्नोति

(ग) धर्मोपदेशाय ज्ञानवृद्धाः जनाः आवश्यकाः (घ) सभा केवलं राजकार्यार्थं भवति

Vi दुर्जनेन सह सख्यं किमर्थं न कार्यम् ?

(क) सः मित्रं भवति (ख) सः धनं ददाति

(ग) सः शिक्षां ददाति (घ) सः उष्णाङ्गारवद् हानिकरः भवति

——000——